12 T1 damaged from स्त in 12a up to या in 13c. —a) Cm g t खन्यमाने (as in text), Ck खान्यमाने Ś1 D5 8 12 तदा, M2 तले (for ततस्) Ñ2 V B D10 13 पुन खनंतस्ते तत्र, D1–3 7 9 11 M4 खनमानास्तु(D3 °सु [sic])ते तत्र(D11 तस्मिन्, M4 सर्वे) —b) V3 B3 सर्षे°, D9 °त्तमं (for पर्वतोपमम्) —c) Ś1 D5 8 11–13 आशा°, Ñ2 V1–3 B4 दिशा°, B1–3 D3 7 9 दिशो°, Cg k as in text (for दिशागज) ❀ Ct दिशा इत्यावन्तम्। ❀ —d) Ś1 Ñ2 V B D1–3 5 7 8 10–13 महीमिमा(Ñ2 V B D13 इमा महीं [by transp]), M4 वसुधरा (for महीतलम्) D9 पद्मया धारयत महीं

Arya Research Team

सपर्वतवनां कृत्स्नां पृथिवीं रघुनन्दन ।
शिरसा धारयामास विरूपाक्षो महागजः ॥ १३
यदा पर्वणि काकुत्स्थ विश्रमार्थं महागजः ।
खेदाच्चालयते शीर्षं भूमिकम्पस्तदा भवेत् ॥ १४
तं ते प्रदक्षिणं कृत्वा दिशापालं महागजम् ।
मानयन्तो हि ते राम जग्मुर्भित्त्वा रसातलम् ॥ १५
ततः पूर्वां दिशं भित्त्वा दक्षिणां बिभिदुः पुनः ।
दक्षिणस्यामपि दिशि ददृशुस्ते महागजम् ॥ १६
महापद्मं महात्मानं सुमहापर्वतोपमम् ।
शिरसा धारयन्तं ते विस्मयं जग्मुरुत्तमम् ॥ १७
ततः प्रदक्षिणं कृत्वा सगरस्य महात्मनः ।
षष्टिः पुत्रसहस्राणि पश्चिमां बिभिदुर्दिशम् ॥ १८

G 1 42 18
B 1 40. 19
L 1. 37. 18

13 T1 damaged up to या in ^{c} (cf v l 12) —^{b}) Ś1 D5 12 स नरोत्तम, D8 स गजोत्तम (for रघुनन्दन) —For 13^{ab}, D2 subst l 1–2 of 870* —^{c}) Ś1 D2 5 8 12 सदा बिभर्ति काकुत्स्थ (D2 शिरसा), Dt D6 G1 3 M2 3 transp शिरसा and धारयामास —Ś1 om (hapl) 13^{d}–14^{a} —For 13, D11 subst l 1 of 870*

14 Ś1 om 14^{a} (cf v l 13) —^{b}) Ś1 D5 8 11 विश्रामार्थं, Cg as in text (for विश्र°) Ś1 D5 8 11 12 स वारण., G1 °वल (for महागज) —^{cd}) G1 तथा (for तदा) —T1 damaged from भवेत् up to क्षि in 16^{b} D6 *वेत्, D14 T2 3 [अ]भवत् (for भवेत्) Ś1 D5 8 11 12 ईषच्चालयते स्कंध कपते मेदिनी तदा —For 13–14, Ñ2 V B D1 3 7 9 10 13 M4 subst, D2 subst l 1–2 for 13^{ab} and l 3–4 for 14, D11 subst l 1 only for 13

870* शिरसा नरशार्दूल सशैलवनकाननाम् ।
नानाजनपदाकीर्णां नानापत्तनशोभिताम् ।
यदा च पर्वणि गज खेदाच्चालयते शिर ।
सपर्वतवना राम तदेय चलति क्षमा ।

[V4 reads nom sing for all accu sing in l 1 and 2 —(l 1) D1–3 7 9–11 रघुशार्दूल —D3 7 om l 2 —(l 3) D1 2 M4 स यदा (for यदा च) V2 [अ]सौ गजवर° (for पर्वणि गज) D3 7 9 स वै यदा राम(D3 7 पणि [sic])गज (for the prior half) D7 चा*यते (for चालयते) B2 transp गज and शिर —(l 4) Ñ2 reads वना राम in marg D9 [ए]व (for [इ]य) V1 चल्ति°, V4 D1–3 7 9 M4 चलते मही (for चलति क्षमा)]

15 T1 damaged (cf v l 14) —^{a}) Ś1 B4 D2 5 8 12 13 ते त (by transp), D9 तत्ते (for तं ते) D2 3 7 8 11 प्रदक्षिणीकृत्य(D2 8 °त्वा), D9 प्रदक्षिणा कृत्वा —^{b}) Ś1 D1–3 5 7–9 11 12 दिक्पाल कुजरोत्त(D3 7 9 °प)मं, Ñ2 V B D10 13 M4 दिशो(Ñ2 V4 B4 M4 °शा, V2 3 D10 °शा)गजमरिंदम(D10 M4 °मा) —D2 om, Ś1 reads in marg 15^{c}–16 —^{c}) Cg k t मानयत Ct हि (as in text) Ñ2 V B D10 11 13 M4 मन्यमाना (V2 °न, V4 °ना [both sic]) दिशा(D13 °श, M4 °शा) पालं; D1 3 7 9 मन्यमाना दिशो(D1 °शा, D9 °शा)रक्षं, D5 खनमाना दिश रक्षन्, D8 खन्यमाना दिशो रक्षं, D12 मन्यमाना दिशा रक्षा —Ñ2 V B1 3 4 D10 13 M4 om 15^{a}–16^{a} —^{d}) D3 G4 जित्वा, D9 तीर्त्वा, G2 छित्त्वा (for भित्त्वा) M3 भित्त्वा जग्मू (by transp) B2 D1 3 5 7–9 11 12 G3 वसुधरा (for रसातलम्).

16 T1 damaged up to क्षि in ^{b} (cf v l 14) D2 om, Ś1 reads in marg 16, whereas Ñ2 V B1 3 4 D10 13 M4 om 16^{a} (cf v l 15) G1 om (hapl) 16-17 —^{a}) M3 एव, Cg तत (as in text) D3 7 पूर्व- (for पूर्वां) D5 दिशा Dt D6 हित्वा, G3 गत्वा, Cg as in text (for भित्त्वा) —^{b}) D10 13 बिभिदुर्दक्षिणा (by transp) Ñ2 V B D10 13 M4 दिश (for पुन). —After 16^{b}, M4 ins

871* रसातलादिति महीं खनमाना महाबला ।

—^{c}) B4 °पि च, D12 °पिम (metathesis), G4 °मभि- (for दक्षिणस्यामपि) Ñ2 V1 2 4 B D1 3 5 7 8 10 12 13 पुनर्; D11 तथा, G2 *inf lin* (for दिशि) —^{d}) Ñ2 V B D1 3 5 7 8 10–13 गजोत्तमं (for महागजम्)

17 G1 om 17 (cf v l 16) —^{a}) D1 °नागं (for महात्मान) V4 महात्मान महापद्म (by transp) —^{b}) Ś1 B2 तिष्ठत, D9 G3 M3 Cg सुमहत् (for सुमहा-) Ñ2 V B1 3 4 D1–3 5 7 8 10–13 तिष्ठंत मदरोपमं(D12 °त्तमं), M4 मेरुमदरवर्चसं —V1 damaged from 17^{c} up to the prior half of 872* T1 damaged from रय in 17^{c} up to या in 19^{a} —^{c}) Ś1 Dt D1–3 5–9(D9 before corr हि) 11 12 G4 गा (for ते) Ñ2 V2–4 B2–4 D10 13 त च दृष्ट्वा महाकाय, B1 त दृष्ट्वा तु महात्मान, M4 त दृष्ट्वा च महारूप —^{d}) Ñ2 V2–4 B D10 13 M4 परम ययु (for जग्मुरुत्तमम्) Ś1 D1–3 5 7 8 11 12 ते दृष्ट्वा विस्मय गता (D11 ययु°)

18 T1 damaged (cf v l 17) —^{a}) Dt D6 8 ते तं, M2 तं ते, Cg as in text (for तत). —For 18^{ab}, Ñ2 V B D1–3 7 10 13 M4 subst

872* कृत्वा तमपि नागेन्द्रं प्रदक्षिणमरिंदम ।

[V1 damaged for the prior half (cf v l 17) D7 तद् (for तम्) B2 D1–3 7 M4 अरिंदमा]

—^{c}) D5 9 षष्टिं Ñ2 V B D1–3 7 10 13 M4 स(D2 सा)गर(Ñ2 °*)स्यात्मजा(D2 °*) राम —^{d}) D5 दक्षिण (for पश्चिमा) D9 M4 बिभिदु पश्चिमा (by transp).

Anya Research Team

G I 42 18
B I 40. 20
L I 37 18

पश्चिमायामपि दिशि महान्तमचलोपमम् ।
दिशागजं सौमनसं ददृशुस्ते महाबलाः ॥ १९
तं ते प्रदक्षिणं कृत्वा पृष्ट्वा चापि निरामयम् ।
खनन्तः समुपक्रान्ता दिशं सोमवतीं तदा ॥ २०
उत्तरस्यां रघुश्रेष्ठ ददृशुर्हिमपाण्डुरम् ।
भद्रं भद्रेण वपुषा धारयन्तं महीमिमाम् ॥ २१
समालभ्य ततः सर्वे कृत्वा चैनं प्रदक्षिणम् ।
पप्टिः पुत्रसहस्राणि विभिदुर्वसुधातलम् ॥ २२
ततः प्रागुत्तरां गत्वा सागराः प्रथितां दिशम् ।
रोषादभ्यखनन्सर्वे पृथिवीं सगरात्मजाः ॥ २३
ददृशुः कपिलं तत्र वासुदेवं सनातनम् ।
हयं च तस्य देवस्य चरन्तमविदूरतः ॥ २४

19 T1 damaged up to या in [a] (cf v l 17) —[a]) M4 पश्चिमस्यामपि Ś1 D1-3 5 7 12 तदा, D11 तथा (for दिशि) —[b]) Ñ2 V B D10 13 M4 कैलासशिखरोपम —[c]) Ś1 D5 12 दिक्कुजर, Ñ2 V B D10 13 आशा°, D3 7 दिशो°, D6 11 दिशा° (for दिशागज) Ś1 D1-3 5 7 11 12 M4 सुमनस, V2 मौनमनसं (hypermetric), Cg as in text (for सौमनस) —[d]) Ś1 Ñ2 V2-4 B3 4 D1-3 5 7 10-13 M4 महाबलं, B1 गजोत्तमं

20 [a]) Ś1 B4 Dt D2 8 12,13 ते तं (by transp), V1 ते ते (sic), V2 त तु, G3 तत· (for त ते) —[b]) D2 दृष्ट्वा (for पृष्ट्वा) —T1 damaged from यम् up to न्तं in 21[d] Cm g k t निरामय (as in text) Ś1 D1-3 5 7 12 [ए]वमनामयं, Ñ2 V B D10 13 M4 [अ]नामय तत, D11 [ए]व समानय (sic) (for [अ]पि निरामयम्) —[cd]) G2 नरत (metathesis), M2 3 खनितुं, Ck as in text (for खनन्त) Ś1 D5 12 समतिक्राता (D5 °तं), Dt D4 6 8 14 G1 2 4 M1 2 समुपा°, Cg k as in text (for समुप°) Ñ2 V B D10 11 13 प्रोत(V2 आ)खनंतो ययुर्वीरा (V1 °यु सर्वे), D1-3 7 M4 खनमाना ययुर्वीरा (for °) Ś1 Ñ2 V B D1-5 7 11-13 T2 3 M4 Cg k हैम°, D10 हैवमतीम् (metathesis), Ct as in text (for सोमवतीं) Ñ2 V B D1-3 7 10 M4 अपि, D4 11 G4 तथा, D13 14 T2 G2 M1-3 तत, Ck as in text (for तदा) G3 ततो हैमवतीमाशा खनंतस्तेभिचक्रमु.

21 T1 damaged up to न्तं in [d] (cf v l 20) —[a]) Ñ2 V1 B4 अपि तथा (V1 B4 तु ते), V2 3 D1-3 7 G1 M4 अपि च ते(V3 G1 M4 दिशि, D2 ते ते [ditto]), V4 अपि ततो (for रघुश्रेष्ठ) —[b]) D2 ते ददुर् (sic) (for ददृशुर्) B3 4 D14 T2 G M हिमपाडर —[d]) M4 धारयतीं (sic) Ś1 D1 2 5 11 12 धराम् (for महीम्) Ñ2 V B D10.13 इमा महीं (by transp)

22 [ab]) M3 तमालभ्य, Cg k t समा° (as in text) Ś1 D5 12 च ते, G1 च तं (for तत) Ñ2 V B D1-3 7 10 13 M4 तमप्यालभ्य(D13 °क्ष्य)ते सर्वे (D10 सर्वे ते [by transp]) (for [a]) Ñ2 V1 3 B D10 M3 [अ]भि, V2 [अ]ति-, V4 D2 [ए]व, D13 M4 [अ]पि (for [ए]नं) D11 ते त प्रदक्षिणीकृत्वा पृष्ट्वा चैनमनामय —[c]) Ś1 D5 12 राजपुत्रास्ततो भूयो, Ñ2 V B D1-3 7 10 11 13 M4 सहिता पुनरेवेद —[d]) D12 विवेशुर्, G2 विदुभिर् (metathesis) (for विभिदुर्) Ś1 Ñ2 V B D5 12 13 M4 धरणीतल

23 D7 om 23[ab] T3 damaged from रा in 23[a] up to ल in 24[a] —[a]) Ñ2 V B D10 13 M4 प्रागुत्तरा दिश, D5 12 Ck °त्तर, Cg t as in text (for तत प्रागुत्तरा) —[b]) T3 सागरां (sic!), M1 सगरा D9 14 T2 3 M1 3 प्रथिता, G3 प्रस्थिता, Cg t as in text (for प्रथिता) Ś1 D5 12 य(D12 या)ज्ञिया(D5 12 °या·) पृथिवीमिमां, Ñ2 V B D10 13 तत(V4 पुन)स्ते स(V1 सा)गरात्मजा·, D1-3 11 M4 दिश ते (D1 ते दिश [by transp]) सगरात्मजा —[c]) M3 पूर्वे (for सर्वे) Ś1 (after corr as in text) D5 12 अभ्यन्वतु(D12 °न्तु)पिता सर्वे —[d]) Ś1 D5 12 काकुत्स्थ (for पृथिवीं) —For 23[cd], Ñ2 V B D1-3 7 10 11 13 M4 subst

873* अमर्षवशमापन्नाश्चख्नुरेव धरामिमाम् ।
तत्राथ प्रोत्खनन्तस्ते क्षोणीमपि समन्तत ।
तत्र ते तु रघुश्रेष्ठ सगरस्यात्मजास्तत ।

[D7 om 1 1 —(1 1) D1 अमर्षं च समापन्नाश् (for the prior half) V2 चायुरेव (sic), B1 illeg, D11 रघवे (sic), M4 चखनश्च (for चख्नुरेव) B1 वसुधरा, B2 धरातल, D1-3 11 M4 रसातल (for धरामिमाम्) —D11 om (hapl ?) l 2 —(l 2) V1 [आ]शु (for [अ]थ) D1-3 7 M4 तत्रापि(M4 °थ) खनमानास्ते महीममिततेजस —All the above MSS except D11 om l 3]

—After 23, Ś1(after 24[ab]) Dt D4 6 8 9 14 T2 3 G M1-3 Cm g ins

874* ते तु सर्वे महात्मानो भीमवेगा(G2 °ग) महाबला ।

24 T3 damaged up to ल (cf v l 23) —[a]) Ñ2 V1-3 B D1-3 7 10 11 13 M4 नाम, V4 राम (for तत्र). —[b]) Ś1 D5 12 महाबल (for सनातनम्) Ñ2 V B D1-3 7. 10 11 13 M4 देव नारायणं प्र(V2 4 वि)भु —After 24[ab], Ś1 ins 874* Ś1 D1-3 5 7 9 12 M4 om 24[cd] —[c]) D11 om च (submetric) D13 यज्ञिय तस्य (for तस्य देवस्य) —[d]) B3 M1 अपि दूरत B1 चिरतनदूरत —After 24, Dt D4 6 8 14 S (except M4) ins

875* प्रहर्षमतुल प्राप्ता सर्वे ते रघुनन्दन ।

ते तं यज्ञहनं ज्ञात्वा क्रोधपर्याकुलेक्षणाः ।
अभ्यधावन्त संक्रुद्धास्तिष्ठ तिष्ठेति चाब्रुवन् ॥ २५
अस्माकं त्वं हि तुरगं यज्ञियं हृतवानसि ।
दुर्मेधस्त्वं हि संप्राप्तान्विद्धि नः सगरात्मजान् ॥ २६

श्रुत्वा तद्वचनं तेषां कपिलो रघुनन्दन ।
रोषेण महताविष्टो हुंकारमकरोत्तदा ॥ २७
ततस्तेनाप्रमेयेन कपिलेन महात्मना ।
भस्मराशीकृताः सर्वे काकुत्स्थ सगरात्मजाः ॥ २८

G. I. 42 26
B. I 40 30
L. I. 39. 26

इति श्रीरामायणे बालकाण्डे एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

Arya Research Team

25 [a]) V1 ते तु, B1 2 D1 3–5 7 11 12 T3 M2–4 त ते (by transp), Cm g k as in text (for ते तं) —T1 damaged from न up to य in 26[b] Ś1 B4 D5 11 12 °हर, Ñ2 B3 (marg also as in text) D10 14 T1 2 G2 4 M1 2 हयहरं, D1 3 7 °वधं, D13 °हय, Cm k t as in text (for यज्ञहन) Ñ2 V1–3 B D1 3 7 10 11 13 M4 मत्वा, V4 हत्वा (sic), D2 दृष्ट्वा (for ज्ञात्वा) —After 25[ab], Ś1 (marg) Dt D4 6 8 9 14 T2 3 G M1–3 ins

876* खनित्रलाङ्गलधरा नानावृक्षशिलाधरा ।

—[c]) D13 ते° (for सक्रुद्धान्) Ś1 (marg also as in text) D5 12 अभ्यधावन्नरश्रेष्ठ, V3 B1 2 4 D1–3 7 M4 अभ्यधावन्सुस(V3 °न्स्वर्यं)क्रुद्धा, G2 अभ्यधावन्तत. कृत्वा —D5 11 12 ins after 25, Ś1 ins after 27

877* संमूढा न विदुस्तं वै देवमक्षयमव्ययम् ।

26 T1 damaged up to य in [b] (cf v l 25) Ñ2 V B D1–3 5 7 10–13 om , Ś1 reads in marg 26–27 —[a]) M4 चैवार्श्व (for तुरग) —[b]) D9 T3 G3 4 M1 2 4 याज्ञियं, M3 राज्ञीय (sic) (for यज्ञिय) —[c]) D9 M4 °स्त्वा, G1 दुर्मेधा°, M2 °त्वं (for दुर्मेधस्त्व) M4 सं*ज्ञान् (for सम्प्राप्तान्)

27 Ñ2 V B D1–3 5 7 10–13 om , Ś1 reads in marg 27 (cf v l 26) —[a]) D9 14 T2 G4 M1 तु (for तद्) —[c]) G3 क्रोधेन (for रोषेण) —T1 damaged from विष्टो up to the end of this Sarga —After 27, Ś1 ins 877*

28 T1 missing (cf. v l 27) —[b]) Ś1 (*sup. lin* also as in text) श्वसता ते, Ñ2 V1 3 B1–3 D10 13 M4 तेप(B1 °पि, M4 °व)ध्याता, V2 तेजोनीता, V4 तेजोभाताः B4 D1 3 (with hiatus) अपध्याता(D1 °त्वा), D4 कापिलेनः D5 [अ]प्येते शप्ता, D11 12 [अ]थैते शप्ता(D11 शाता) (for कपिलेन) D2 7 (with hiatus) अपध्यातात्मना(D2 °**)त्मना —[c]) G4 -गताः (for -कृता) —[d]) Ñ2 V B D1–3 7 10 11 13 M4 समेता. (for काकुत्स्थ) V1 साग°, D3 °रा*जा. (for सगरात्मजा·) —After 28, M3 (*sup. lin sec m*) ins

878* ततस्तु राजा ह्यशुभानि दृष्ट्वा
वीरो निमित्तानि कृतेषु भस्म ।
पुत्रेषु पुत्रात्मजमेव वीक्ष्य
चिरं निदध्यौ च विसिस्मिये च ।

Colophon T1 missing, Ś1 D5 11 12 om. (continue the sarga) —*Kāṇḍa name* Dt om Ñ2 V B आदि°, D1 3 अयोध्या°. —After Kāṇḍa name, Ñ2 V1 3 D10 ins बालचरिते —*Sarga name* Ñ2 V B D1–3 7 9 10 कपिलदर्शन. —*Sarga no* (figures, words or both) V1 4 B1 4 D3 9 om Ñ2 B2 3 42, V2 44, V3 D10 41, Dt D4 6 8 14 S(except T1) 40, D1 2 7 33 D13 —काडे —मुनि द — —After colophon, T2 G1 2 4 M2 conclude with श्रीरामाय नम , G3 श्रीमते रामानुजाय नमः.

४०

G. 1 43 1
B. 1 41 1
L. 1. 38 1

पुत्रांश्चिरगताञ्ज्ञात्वा सगरो रघुनन्दन ।
नप्तारमब्रवीद्राजा दीप्यमानं स्वतेजसा ॥ १
शूरश्च कृतविद्यश्च पूर्वैस्तुल्योऽसि तेजसा ।
पितॄणां गतिमन्विच्छ येन चाश्वोऽपहारितः ॥ २
अन्तर्भौमानि सत्त्वानि वीर्यवन्ति महान्ति च ।
तेषां त्वं प्रतिघातार्थं सासिं गृह्णीष्व कार्मुकम् ॥ ३
अभिवाद्याभिवाद्यांस्त्वं हत्वा विघ्नकरानपि ।
सिद्धार्थः संनिवर्तस्व मम यज्ञस्य पारगः ॥ ४
एवमुक्तोऽशुमान्सम्यक्सगरेण महात्मना ।
धनुरादाय खड्गं च जगाम लघुविक्रमः ॥ ५
स खातं पितृभिर्मार्गमन्तर्भौमं महात्मभिः ।
प्रापद्यत नरश्रेष्ठ तेन राज्ञाभिचोदितः ॥ ६
दैत्यदानवरक्षोभिः पिशाचपतगोरगैः ।
पूज्यमानं महातेजा दिशागजमपश्यत ॥ ७

40

☞ Ñ1 missing Sarga 40 (cf v l I 33 8) D5 11 12 cont the previous Sarga.

1 Before 1, D13 ins ref. सू-उ-च —^{a}) Ś1 D6 चिरं (for चिर-) Ñ2 V1 2 4 B2-4 D1-3 7 10 11 13 मत्वा, V3 (marg also as in Ñ2) दृष्ट्वा (for ज्ञात्वा) —^{b}) D2 रघुनदन· —^{c}) Ś1 Ñ2 V1 3 4 B D5 10-13 वाक्यं, V2 वाचा, D6 राम (for राजा) —^{d}) V1 D11 दीप्यमान (sic) Ś1 स्वतेजस, V2 सुतें°, D1 11 महौ°, D2 3 7 हृवौजसा (for स्वतेजसा) —After 1, Ñ2 V B D10 13 read 881*.

2 D14 reads 2^{ab} in marg —^{a}) Ś1 D1-3 5 7 9 11 12 शूरस्त्व, Ñ2 V B D10 13 शूरोसि, M1 श्रुतश्च, M4 वीरस्त्वं, Cm g as in text (for शूरश्च). V4 -विज्ञोसि (sic), T2 -वीर्यश्च (for -विद्यश्च) —T1 missing from स्तु in 2^b up to सा in 3^d on a damaged fol —^{b}) G3 पुत्रैस्, Cg k t as in text (for पूर्वैस्) Ś1 D5 12 समर्थश्च महाबल(D12 °ला), Ñ2 V B D1-3 7 10 11 13 पूर्वैस्(D13 °र्वै)तुल्यपराक्रम —After 2^{ab}, Ñ2 B2-4 D10 13 ins ·

879* शीघ्रमायाहि भद्रं ते यथा धर्मो न लुप्यते ।

—^{c}) G1 अन्विच्छन् (for °च्छ) Ñ2 V B D1-3 7 10 11 पितॄन्गच्छ त्वमन्वेष्टुं, D13 पितॄणा च त्वमन्वेष्टुं, Cg as in text (for ^{c}) —^{d}) G1 याहि (for येन) D1 चास्य; D12 *श्वो, G3 Ck वाश्वो (for चाश्वो) Ś1 Ñ2 V1 4 B Dt D1-3 5-9 12 13 G1 2 M3 4 Cg k t [s]पवाहित, G4 महानित·, Cm as in text (for sपहारित)

3 T1 missing up to सा in ^{d} (cf v l 2) —^{a}) D5 अत भीमानि (sic), D12 अतमाम्सनि (sic) (for अन्तर्भौमानि) D9 सर्वाणि, G1 भूतानि, Cm k t as in text (for सत्त्वानि) —For 3^{ab}, Ñ2 V B D1-3 7 10 11 13 subst

880* अन्तर्भूमिनिवासीनि सन्ति सत्त्वान्यनेकश ।

[V2 4 अतर्भूत- (for अन्तर्भूमि-) V2 B4 भूतानि (for सत्त्वानि)]

—^{c}) Dt D6 8 M4 तु, T2 तं (for त्वं). Ñ2 V B D1-3 7 9 10 13 प्रतिविधानार्थं(V2 °धानां च, V3 D1-3 7 9 °घातार्थं); D11 त्व प्रवि° (for त्व प्रतिघातार्थं) —^{d}) M4 धारय (for गृह्णीष्व) Ñ2 V B D10 13 गृहीत्वा व्रज कार्मुक, D1-3 7 9 गृह्यायुधमितो(D9 °मधो) व्रज, D11 सायुधस्त्वमितो व्रज

4 ^{ab}) G4 [अ]भिवाद्यस्, Cm k t as in text (for °वाद्यास्) D6 तु, T3 M3 च (for त्व) Ś1 D5 12 अभिव्रजाभिवाद्यस्त्व संहत्य च रिपूनपि —^{c}) D4 G3 त्व, T3 तु, Ck as in text (for स-) —For 4, Ñ2 V B D1-3 7 10 11 13 subst (Ñ2 V B D10 13 read after 1), while D9 subst 1 1 only for 4^{ab}

881* तानासाद्य पितॄंस्तात हत्वा विघ्नकर च मे ।
कृतार्थ संनिवर्तेथा यज्ञादुत्तारयस्व माम् ।

[(1 1) D2 तामा°, D11 समा° (for तानासाद्य) V1 तां*, V3 तत्र, D2 7 9 तावद्, D11 तास्त्व (for तात) D3 तानापिदस्तावतद् (corrupt) (for the prior half) D13 यज्ञ- (for हत्वा) D11 मम (for च मे) —(1 2) D1-3 7 11 सिद्धार्थं (for कृतार्थं) V1 संनिवर्तते तथा (hypermetric), B1 °र्तस्व, D1-3 सनिवृत्या(D3 °वर्त्या)थ, D7 सनिवर्त्तोथ (for सनिवर्तेथा)]

5 T1 missing from क्तोऽशु up to प्रा in 6^c on a damaged fol —^{a}) Ś1 Ñ2 V3 B D1 3 5 7 10 M4 राम, V1 2 4 D2 11 12 नाम, D13 तेन (for सम्यक्) —^{b}) D12 **त्मना (for महात्मना) —^{c}) D13 आधाय (for आदाय) D2 om च (submetric) —^{d}) M3 रघुविक्रम, Cg लघु° (as in text) Ś1 Ñ2 V B D1-3 5 7 10-13 M4 ययौ त्व(D13 च)रितविक्रम (B4 °मानम)

6 T1 missing up to प्रा in ^{c} (cf v l 5) M4 om (hapl ?), Ś1 reads in marg 6 —^{a}) Cm t खातं (as in text) G4 सहितं, Cg as in text, Ck सु° (for स खात). —^{b}) D5 12 अंतर्भूमौ महर्षिभि —^{cd}) D6 प्रपद्यत, Cm k t प्रापद्यत (as in text) T3 नरश्रेष्टस्. D5 12 पूज्यमानो रघुश्रेष्ठ जगाम लघुविक्रम.

7 ^{a}) Dt D6 8 देव-, Cg as in text (for दैत्य-) —^{b}) D5 पिशाचै पन्नगोरगै —^{c}) Ś1 D5 12 स्तूयमानो, D4 6 G2 M3 °मानो (for पूज्यमान). —^{d}) M4 अवैक्षत, Cg as in text (for अपश्यत) Ś1 D5 12 दिग्गजं स ददर्श ह —For 6-7, Ñ2 V B D1-3 7 10 11 13 subst.:

स तं प्रदक्षिणं कृत्वा पृष्ट्वा चैव निरामयम् ।
पितॄन्स परिपप्रच्छ वाजिहर्तारमेव च ॥ ८
दिशागजस्तु तच्छ्रुत्वा प्रीत्याहांशुमतो वचः ।
आसमञ्ज कृतार्थस्त्वं सहाश्वः शीघ्रमेष्यसि ॥ ९
तस्य तद्वचनं श्रुत्वा सर्वानेव दिशागजान् ।
यथाक्रमं यथान्यायं प्रष्टुं समुपचक्रमे ॥ १०
तैश्च सर्वैर्दिशापालैर्वाक्यज्ञैर्वाक्यकोविदैः ।
पूजितः सहयश्चैव गन्तासीत्यभिचोदितः ॥ ११
तेषां तद्वचनं श्रुत्वा जगाम लघुविक्रमः ।
भस्मराशीकृता यत्र पितरस्तस्य सागराः ॥ १२

G I 43
B I. 41.
L I 38.

882* तमेव पितृमिर्यातं पन्थानमनु संचरन् ।
ययौ वेगेन महता पितॄंस्तान्द्रष्टुमञ्जसा ।
वीक्ष्यमाणो विशसन तै कृतं यक्षरक्षसाम् ।
सोऽवैक्षत विरूपाक्षमाशागजमवस्थितम् ।

[(1 1) V1 स नु* स्मरन्, V2 D1–3 7 11 अनु सस्मरन् (for अनु सचरन्). —(1 2) V1 B1 2 D1–3 7 अन्वेष्टुम्, V2 4 वै द्रष्टुम् (for तान्द्रष्टुम्) D1–3 7 आज्ञया (for अञ्जसा) —(1 3) V4 D1–3 7 पश्यमानो (for वीक्ष्यमाणो) B4 विनशन (for विशसन) D13 transp तै and कृत D1 reads (marg also) पूज्यमानो दिशा नाथै स्तुतिभिर्यक्षरक्षसा for 1 3 —(1 4) V4 सौवैकृत (sic), B1 सोधिकृत, D1 2 सोपश्यच्च (D1 °त), D3 7 सोप्यपश्यद्, D11 ददर्श स, D13 सौन्वैकृत (sic) (for सोऽवैक्षत) D1–3 7 दिशो (D1 2 °शा) गजम्, D11 दिग्राज सम्- (for आशागजम्) V2 4 उपस्थित]

8 T1 missing from ण कृत्वा up to कृता in 9c on a damaged fol —a) D2.7 प्रदक्षिणीकृत्य —b) Ñ2 B4 D12 स्पृष्ट्वा, G2 दृष्ट्वा (for पृष्ट्वा) D14 T2 G2 4 M1 चापि, M2 [ए]व च (by transp), M3 [अ]पि च (for चैव) Cm t निरामय (as in text). Ś1 D5 12 M4 चैन (Ś1 °व)मनामय, Ñ2 V B D1–3 7,10 11 13 चानामय तत (for चैव निरामयम्) —c) Ś1 Ñ2 V B D5 10–12 तान्, D1–3 7 13 स्वान्, D14 G2.4 M1 2 स- (for स) D9 स पितॄन् (by transp) —d) Ñ2 V B D1–3 7 10 11 13 हय° (for वाजिहर्तारम्)

9 T1 missing up to कृता in c (cf v l 8) —a) Ś1 D5 11 12 दिग्वारण (D5 °णा, D11 °णो)स्तु, Ñ2 V B D10 13 आशागजोपि, D3 7 दिशो गजोपि, D4 दिशो गजस्तु (for दिशागजस्तु) —D7 om (hapl) 9b–10a —b) Ś1 D5 11 12 सोम्यमंशुमो वच, Ñ2 V B D1–3 10 13 M4 पृच्छांशु (M4 °*)मतो वच, Dt D6 8 प्रत्युवाच महामति, D4 9 T3 G1 3 4 M1 प्रत्याहां°, M3 प्रीत्या चा° —c) Ś1 Ñ2 V1–3 B D1–3 5 10–13 तमुवाच, V4 उवाच त, D9 आसमाज, Cm g t as in text (for आसमञ्ज) ❀ Ck आसमज असमजसुत । ❀ —d) D9 14 T3 एष्यति, Ck °सि (as in text) Ś1 हयं प्राप्य ममेति च (marg also त्वमेव च), Ñ2 V1 2 4 B2–4 D2 10 11 13 M4 एष्यसी (V1 °*)त्यभित. स्थित (Ñ2 V2 B2 D2 10 M4 °तं), V3 एष्यसीत्यभिहित स्थित (hypermetric), B1 एष्यसीत्यभिवाछित, D1 3 5 12 हय त प्राप्स्यसीति च

10 D7 om 10a (cf v l 9) —a) Cg तस्य (as in text) Ñ2 V B D1 2 10 11 13 इति तस्य वच श्रुत्वा —B3 T2 read 10b–12a in marg —b) D3 om, M3 सर्वानपि (for सर्वानेव) Ś1 V B D1–3 5 7 11–13 हि (D1–3 7 11 स) दिग्गजान्, D8 दिशो° (for दिशागजान्) —c) B4 यथाकाम, D11 यथाक्रम्यं (for °क्रम) D1 2 11 M4 समासाद्य (for यथान्याय) —d) G3 एवोपचक्रमे, Cg as in text (for समुप°) D1 2 11 M4 पप्रच्छोत्सुकमानस

11 B3 T2 read 11 in marg. (cf v l 10) T1 missing from 11 up to भस्मराशीकृ in 12c on a damaged fol —a) M3 तु (for च) D4 दिशां°, M3 दिशानागैर् (for दिशापालैर्) Ś1 D3 5 7 11 12 दिक्पालै स तु (Ś1 संत, D3 7 स च) तै सर्वैर् —b) D3 7 वारणैर्, D5 11 12 14 T2 G4 वाक्यज्ञो (for वाक्यज्ञैर्) ❀ Cg यद्वा परवाक्याशयज्ञै । ❀ T3 G M1–3 -कोविद, Cg k as in text (for -कोविदैः). ❀ Ct द्वितीयवाक्ये कृत्य· । ❀ —For 11ab, Ñ2 V B D1 2 10 13 M4 subst

883* एतदेव च तैरुक्तो गजैराशुपराक्रम. ।

[D2 °*, M4 वचश्चोक्तो (for च तैरुक्तो). V4 गजम् (sic), B1 D1 2 M4 जगाम (for गजैर्) V2 -पराक्रम (sic), V3 D13 -पराक्रमै (for -पराक्रम·)]

—D1 2 M4 om (hapl) 11c–12b (cf 883*) —c) D10 पूजित (for पूजित) V4 स गजैश्, B4 सहजश्, D5 12 सहितैस् (for सहयश्) D5 12 तैस्तु (for चैव) D11 चैव सहयो (by transp) —d) V1 गतासीद्, V4 B1 Dt D6 8 G1 Ck [आ]गतासि, D3 गगासि· (sic), D7 गतास्मि, G3 हतासि (for गन्तासि) Ś1 D3 5 7 12 °भाषित, Ñ2 V1 2 B3 4 D10 13 [इ]त्य (V1 अं)शुमानपि, V3 B1 2 [इ]त्यंशुमानि (B2 °मन्नि)ति, V4 ह्यशुमन्निति, D11 °भावित, Cg as in text (for [इ]त्यभिचोदित)

12 B3 T2 read 12a in marg (cf v l 10) T1 missing up to क्ष in c, D1 2 M4 om 12ab (for both cf v l 11) —a) Ñ2 V B2–4 D10 13 स, B1 D5 11 12 तु (for तद्) B1 तद्वच (for वचन) —b) Ś1 D7 [अ]लघु°, V1 धरणीतल, B1 रघुनदन, B4 बहु° (for लघुविक्रम). —c) D5 reads यत्र in marg —d) T3 G2 3 M1–3 Ct तत्र, Cg k as in text (for तस्य) M2 सागर, Ck t °रा. (as in text) —After 12, T2 M3 Ck ins

884* दृष्ट्वा भास्करसकाशान्भस्मराशीकृतान्बहून् ।

Arya Research Team

G. I. 43 13
B I 41. 13
L. I. 38 13

स दुःखवशमापन्नस्त्वसमञ्जसुतस्तदा ।
चुक्रोश परमार्तस्तु वधात्तेषां सुदुःखितः ॥ १३
यज्ञियं च हयं तत्र चरन्तमविदूरतः ।
ददर्श पुरुषव्याघ्रो दुःखशोकसमन्वितः ॥ १४
स तेषां राजपुत्राणां कर्तुकामो जलक्रियाम् ।
सलिलार्थी महातेजा न चापश्यज्जलाशयम् ॥ १५
विसार्य निपुणां दृष्टिं ततोऽपश्यत्खगाधिपम् ।
पितॄणां मातुलं राम सुपर्णमनिलोपमम् ॥ १६
स चैनमब्रवीद्वाक्यं वैनतेयो महाबलः ।
मा शुचः पुरुषव्याघ्र वधोऽयं लोकसंमतः ॥ १७
कपिलेनाप्रमेयेन दग्धा ह्येते महाबलाः ।
सलिलं नार्हसि प्राज्ञ दातुमेषां हि लौकिकम् ॥ १८
गङ्गा हिमवतो ज्येष्ठा दुहिता पुरुषर्षभ ।
भस्मराशीकृतानेतान्पावयेल्लोकपावनी ॥ १९

---

13 ^{a}) D1 स दुःखशोकाभिहतस्, D2 दु खशोकेनाभिहतस्. —^{b}) Ñ2 V B D10 13 सुतोथ ह्य(B2 °भूद; D10 °ह्याप्य)समंजस, D1-3 7 तनयोथात्मसमजस, D11 पुत्रश्चैवासमजस· —^{c}) Ś1 चुकोप, D5 चुक्रोध (for चुक्रोश) Cg परमार्तस् (as in text) Ś1 °यत्तो, D3 5 7 12 M4 °यस्तो (for परमार्तस्तु) —^{d}) D5 12 वधे (for वधात्) —For 13^{cd}, Ñ2 V B D1 2 10 11 13 subst

885* चुक्रोशार्तस्वरं दृष्ट्वा भस्मराशीकृतान्पितॄन् ।

[B1 [आ]र्तं स्वय, D11 [आ]र्तस्वरो (for °स्वर) V4 om दृष्ट्वा B4 अपि (for पितॄन्)]

14 T1 missing from च in 14^{a} up to सलिलार्थी in 15^{c} on a damaged fol —^{a}) D9 G3 M2 4 याज्ञी(D9 °ज्ञि)य, D14 T1 G1 M3 Cg यज्ञीयं (for यज्ञियं). Ñ2 V B D1 2 10 11 13 अपश्यत्तु(D11 °श्यं तु[sic])रग त च(Ñ2 B3 D10 13 तु) —^{b}) B1 om चरन्त B3 अपि°, D5 ह्व°, D14 °श्त· (for अविदूरत) —^{c}) D3 7 T3 -व्याघ्र (for -व्याघ्रो) —^{d}) D3 7 -समाहत· (for -समन्वित·) —For 14^{cd}, Ñ2 V B D1 2 10 11 13 subst .

886* तदा पर्वणि नागेन हृतं वेलावने स्थितम् ।

[D1 (marg) glosses पर्वणि पौर्णमास्यां प्रधानयज्ञकाले वा । " पर्वण्यपहृते चाग्नेर्यज्ञविघ्न प्रजायते । अपर्वणि हृते चान्यो नियोज्यो यज्ञकर्मणि ॥ " Ñ2 D13 कृत (for हृत) V1 D1 2 वेलावन- (for वेलावने)]

15 T1 missing up to सलिलार्थी in ^{c} (cf v l 14) —^{a}) D14 illeg for तेषा —^{b}) Ś1 D1-3 5 11 12 [अं]जलि-, Cg as in text (for जल-) —^{c}) Ś1 D1 5 11 12 सलिलार्थं, Dt स जलार्थी, D13 14 सलिलार्थे (for सलिलार्थी). —^{d}) Ś1 D5 12 तदा (for न च). Ñ2 V B D1-3 7 10 11 13 नापश्यत्सलिल क्वचित्.

16 ^{a}) D9 विशीर्य, G3 प्रसार्य, Cm g t as in text, Ck विधाय (for विसार्य) G2 निपुण, M4 विपुलां, Cm g k t as in text (for निपुणां) Ñ2 V B D2 3 7 10 11 13 पात(V2 पते)यंश्चाभि(D2 3 7 °यन्सर्व)तो दृष्टिं, D1 विचारयत्ततो दृष्टिम्, D5 12 विचार्य निपुणं दृष्ट्वा —^{b}) G2 तपो, G3 स च (for ततो) M3 खगाधिप., M4 खगोत्तम (for खगाधिपम्) Ś1 (marg as in text) Ñ2 V B D3 5 7 10 12 13 ततस्(V4 D2.7 तत्र)तत्र ददर्श ह(V2 सः), D11.2 अपश्यत स्व(D2 °त्पत)गोत्तम, D11 अपश्यत्स खगेश्वर —^{c}) D3 राम, D12 नाम (for राम) —T1 missing from नि in 16^{d} up to दग्धा in 18^{b} —^{d}) V2 सौवर्ण, B4 सुवर्ण (for सुपर्णम्) Ñ2 V B D10 13 पतगोत्तम, T2 3 G3 4 अचलोपम, Cm g k t as in text (for अनिलोपमम्)

17 T1 missing (cf v l 16) —^{a}) G2 न (for स). D6 [ए]तम् (for [ए]नम्) G1 राम, G2 वाक्य (sic) (for वाक्य) —D5 12 om (hapl ?) 17^{c}–18^{b} Ś1 reads 17^{c}–18^{b} in marg D1 damaged after प in ^{c} up to य in ^{d} —^{d}) D2 दु खशोकसमतत.

18 T1 missing up to दग्धा in ^{b} (cf v l 16) D5 12 om, Ś1 reads in marg 18^{ab} (cf v l 17) —^{b}) Ñ2 V1-3 B D1-3 10 11 13 M2 °ह्येते, V4 °श्चेते; D4 हता°; D7 °होमे, G3 निर्दग्धा हि (for दग्धा हीमे). M4 °प्रभा (for महाबला). —^{c}) Ś1 नार्हसि सलिल (by transp), Ñ2 V3 B2-4 Dt D2 3 6–8 10 11 13 सलिल(D6 7 °ले) नार्हसे, V1 2 4 B1 नार्हं(V2 ईह)से सलिलं, D5 12 अर्हसि सलिलं, Cm g k t as in text (for सलिल नार्हसि) Ś1 Ñ2 V2–4 B D1–3 5 7 10–13 वीर, V1 होषा (for प्राज्ञ) —^{d}) M3 कर्तुम्, Cm g k t as in text (for दातुम्) Ś1 V4 B1 D5 12 एभ्यो नरोत्तम(D5 °म·), Ñ2 V3 B2–4 D10 13 °त्वमन्यत. (Ñ2 B3 D10 °था, V3 °*), V2 एभ्यो न चान्यत., D1–3 7 11 एषां (D2 °भ्यो) महाद्युते, G1 अर्हसि°, M4 एषां महात्मना (for एषा हि लौकिकम्) V1 वीर दातु त्वमन्यत

19 ^{a}) D14 हिमवता (for हिमवतो) G4 ज्येष्ठ- (for ज्येष्ठा) —^{b}) V2 कन्या हि (for दुहिता) Ñ2 V B D1–3 7 10 11 13 M4 सरिता वरा, T3 °भ. (for पुरुषर्षभ) —After 19^{ab}, B3 ins

887* पूजिता त्रिषु लोकेषु सर्वैरेव सुरासुरैः ।

On the other hand, T3 ins.

888* सा नीयता त्वया प्राज्ञ ततो यास्यन्ति ते दिवम् ।

T3 cont, whereas Ś1 (marg) Dt D4 6 8 9 14 T1 2 G M1–3 ins after 19^{ab}

889* तस्यां कुरु महाबाहो पितॄणां सलिलक्रियाम् ।

[M2 तस्या (for तस्यां) —T1 missing from कुरु up to 20^{b} on a damaged fol. D9 °प्राज्ञ (for महाबाहो). D9 11 T3 G M1.2 तु जल-, M3 हि जल- (for सलिल-)]

तया क्लिन्नमिदं भस्म गङ्गया लोककान्तया ।
षष्टिं पुत्र सहस्राणि स्वर्गलोकं नयिष्यति ॥ २०
गच्छ चाश्वं महाभाग संगृह्य पुरुषर्षभ ।
यज्ञं पैतामहं वीर निर्वर्तयितुमर्हसि ॥ २१
सुपर्णवचनं श्रुत्वा सोंऽशुमानतिवीर्यवान् ।
त्वरितं हयमादाय पुनरायान्महायशाः ॥ २२
ततो राजानमासाद्य दीक्षितं रघुनन्दन ।
न्यवेदयद्यथा वृत्तं सुपर्णवचनं तथा ॥ २३
तच्छ्रुत्वा घोरसंकाशं वाक्यमंशुमतो नृपः ।
यज्ञं निर्वर्तयामास यथाकल्पं यथाविधि ॥ २४

G I 43 25
B I 41 24
L I 38 25

—^{c}) M$_{2}$ सर्वान् (for एतान्) —^{d}) Ś$_{1}$ Ñ$_{2}$ V B$_{2\,4}$ Dt D$_{1-3\,5-8\,11\,12}$ G$_{3}$ M$_{2}$ Cg k t प्लावयेत् (B$_{4}$ D$_{2\,3}$ °ये), D$_{13}$ पावनी, G$_{1}$ पाययेत् (for पावयेत्) V$_{1}$ D$_{9}$ G$_{3}$ °पाविनी, V$_{3}$ °भागिनी, V$_{4}$ °भाविनी, B$_{2\,4}$ °तारिणी, D$_{5}$ °भावन, D$_{12}$ °भावनी (for लोकपावनी) T$_{3}$ प्लावयिष्यति पावनी

20 T$_{1}$ missing 20^{ab} (cf v l 19 [889*]) —^{a}) Ñ$_{2}$ तयात् (sic), V B D$_{10\,13}$ यावत्, G$_{1}$ यदा, Cg as in text (for तया) D$_{1-3\,7}$ भस्माभिसस्(D$_{1}$ °स्पृ, D$_{2}$ °प्लु)ष्ट (for क्लिन्नमिदं भस्म) —^{b}) D$_{3}$ गगयो (sic), D$_{6}$ गंगायां, D$_{9}$ G$_{2}$ गंगाया (for गङ्गया) V$_{3}$ B$_{1}$ °न्तया, D$_{2}$ °मायया (for लोककान्तया) —^{c}) T$_{2\,3}$ G$_{1\,3\,4}$ M$_{3}$ षष्टिः, Ct as in text (for षष्टिं) Ś$_{1}$ D$_{5\,12}$ तानि (for पुत्र) —^{d}) M$_{2}$ ब्रह्मलोकं Dt D$_{6\,8}$ T$_{3}$ गमिष्यति, G$_{1\,2}$ M$_{1-3}$ नयिष्यसि, Cm g k tp as in text (for नयिष्यति) Ś$_{1}$ D$_{5\,12}$ शक्रलोकाय धा(Ś$_{1}$ या)स्यति ❀ Ct इदं भस्म हे पुत्र षष्टिं सहस्राणि सागरान्स्वर्गलोकं गमिष्यति प्रापयिष्यतीत्यर्थः । ❀

21 ^{a}) Cg गच्छ (as in text) Ś$_{1}$ Dt D$_{8}$ निर्गच्छाश्वं, D$_{6}$ निर्गच्छ त्व, M$_{2}$ गजाश्वं च (for गच्छ चाश्वं) Ś$_{1}$ D$_{5\,12}$ °तेज, G$_{2\,3}$ M$_{1\,2}$ °बाहो (for महाभाग) —^{b}) Ś$_{1}$ D$_{5\,12}$ प्रगृह्य (for संगृह्य) ❀ Ct अश्वं गृहीत्वा निर्गच्छ । ❀ —For 20°–21^{b}, Ñ$_{2}$ (Ñ$_{1}$ missing) V B D$_{1-3\,7\,10\,11\,13}$ M$_{4}$ subst, while Dt D$_{9}$ T$_{2}$ G$_{1\,3}$ M$_{2\,3}$ ins 1 2-3 (T$_{2}$ M$_{3}$ om 1 3) after 20, then D$_{9}$ alone subst 1 4 for 21^{ab}

890* यदैषा भविता तात स्वर्गमेष्यन्ति वै तदा ।
गङ्गामानय भद्रं ते देवलोकान्महीतलम् ।
क्रियता यदि शक्तोषि गङ्गाया अवतारणम् ।
गच्छाश्वमेतमादाय पुनरेव यथागतम् ।

[(1 1) V D$_{1\,11}$ यद्, D$_{2\,3}$ सदा, D$_{7}$ तदा (for यदा) B$_{1\,4}$ [ए]व (for [ए]षा) Ñ$_{2}$ D$_{10}$ om (hapl) second ता D$_{2}$ तत्र, D$_{3}$ त* (for तात) B$_{2}$ (marg as above) एष्यति (for एष्यन्ति) V$_{2}$ ते (for वै) D$_{7}$ स्वर्ग° श्रेष्ठ सतामिव, D$_{11}$ स्वर्गा भविष्यति वै तदा (hypermetric) (for the post half) —(1 2) D$_{13}$ नाक° (for देवलोकान्) —(1 3) V$_{2-4}$ Dt D$_{2\,3\,7\,9\,13}$ G$_{1}$ शक्तोसि (for शक्तोषि) V$_{4}$ Dt G$_{1\,3}$ M$_{2}$ गगायारत्व(V$_{4}$ °श्चा)वतारण, D$_{1-3\,7\,9\,11}$ गगावतरण नृप, M$_{4}$ गगाया अवतारण (for the post half) —(1. 4) V$_{2}$ D$_{3\,7\,9\,11}$ एतम्(for एतम्) D$_{10}$ आसाद्य (for आदाय) V$_{4}$ यथागत° (for यथागतम्)]

—Ś$_{1}$ reads 21°–22 in marg —^{c}) B$_{2}$ चैव; D$_{1-3\,7\,9}$ शीघ्र (for वीर) —T$_{1}$ missing from वै in 21^{d} up to रा in 23^{a} on a damaged fol —^{d}) Ś$_{1}$ V$_{1\,3}$ D$_{5\,12\,13}$ T$_{2}$ G$_{2}$ M$_{3}$ निवर्तयितुम्, D$_{14}$ G$_{1\,3\,4}$ Cm g सवर्तयितुम्, T$_{3}$ सवर्धयितुम्, Ct as in text (for निर्वर्तयितुम्) D$_{5}$ इच्छसि D$_{1\,2}$ गत्वा कालोम्यगादिति, D$_{3\,7\,9}$ मा त्वा(D$_{7}$ त्वा) कालोत्य(D$_{9}$ °व्य)गादिति

22 T$_{1}$ missing, Ś$_{1}$ reads in marg 22 (cf v l 21) —^{a}) M$_{3}$ सुपर्णस्य वचः श्रुत्वा ❀ Cg सुपर्णेति ❀ —^{b}) D$_{5\,11\,12}$ ना(D$_{5}$ रा)म नामत. (for क्षतिवीर्यवान्). Ñ$_{2}$ V B D$_{1-3\,7\,10\,13}$ M$_{4}$ वीर्यवा(D$_{7\,13}$ °मा)नंशुमानथ(V$_{4}$ °मानिति, D$_{1\,2}$ M$_{4}$ °मास्तत, D$_{3}$ °मास्तथा, D$_{7}$ °मास्तदा) —^{c}) Ñ$_{2}$ V B D$_{1-3\,7\,10\,11\,13}$ G$_{3}$ M$_{4}$ त्वरितो (for त्वरित). —D$_{3}$ om 22^{d}–23^{a} —^{d}) Ñ$_{2}$ V$_{1\,2\,4}$ B D$_{1\,2\,10\,11\,13}$ यज्ञम्, M$_{2}$ पुरीम्, M$_{3}$ गृहम् (for पुनर्) Ś$_{1}$ Dt D$_{6\,8\,9}$ G$_{1\,3}$ °तपाः, D$_{1\,2}$ °त्मन, T$_{3}$ महीपतिः (for महायशा) V$_{3}$ यज्ञस्थानमथानयत्.

23 T$_{1}$ missing ततो रा (cf v l 21) D$_{3}$ om 23^{a} (cf v l. 22) —^{a}) Ś$_{1}$ Ñ$_{2}$ V B D$_{1\,2\,5\,7\,10-13}$ M$_{4}$ स राजान समा(Ś$_{1}$ D$_{5}$ °नमथा, D$_{12}$ °नमिहा)साद्य —^{c}) D$_{3}$ नवेदमद् (sic), D$_{9}$ निवेदयद् (for न्यवेदयद्) G$_{2}$ तथा (for यथा) D$_{3}$ तत्त्व, D$_{7}$ [आ]त्थ त्वं, Cm g t as in text (for वृत्त) Ñ$_{2}$ V B D$_{1\,2}$(first time)$_{10\,11\,13}$ M$_{4}$ त(D$_{11}$ अ)स्मै(Ñ$_{2}$ B$_{2}$ °स्मिन्; B$_{4}$ °स्यै) निवेदयामास ❀ Ck यथा वृत्तमिति पितृविषयकमिति शेषः । ❀ —After 23°, D$_{2}$ reads 24^{d} as in V$_{1}$ (repeats in its proper place) and thereafter repeats 23^{c} —^{d}) D$_{12}$ सुवर्ण- (for सुपर्ण-) Ś$_{1}$ D$_{2\,3\,5\,7\,12}$ तत, V$_{2\,4}$ B$_{1\,2}$ D$_{10\,13}$ M$_{4}$ तदा, V$_{3}$ D$_{1\,11\,14}$ T$_{1}$ G$_{3\,4}$ M$_{2}$ यथा, Cm g t as in text (for तथा)

24 ^{a}) Ñ$_{2}$ V B D$_{1\,3\,7\,10\,11\,13}$ M$_{4}$ व्यथितो राजा (for घोरसकाशं) —T$_{1}$ missing from मतो in 24^{b} up to गमें in 25^{c} on a damaged fol —^{b}) Ñ$_{2}$ V B D$_{1\,3\,7\,10}$ M$_{4}$ घोरम्, Dt om (for वाक्यम्) Ñ$_{2}$ V B D$_{1\,3\,7\,10}$ M$_{4}$ वच, D$_{2\,5}$ नृपं, D$_{11}$ [s]भवत् (for नृप) D$_{13}$ राघवांशुमतो वच. —After 24^{ab}, G$_{1}$ M$_{3}$(*inf lin sec m*) ins

891* मुहूर्तं शोकसंतप्त स्थिरचित्तो बभूव ह ।
स तेनाश्वेन नीतेन पौत्रेणांशुमता नृपः ।

[(1 2) M$_{3}$ तेनाश्वेनोप° (for the prior half)]

Ayya Research Team

G. 1. 43 26
B 1 41 25
L 1 38 26

स्वपुरं चागमच्छ्रीमानिष्टयज्ञो महीपतिः ।
गङ्गायाश्चागमे राजा निश्चयं नाध्यगच्छत ॥ २५

अगत्वा निश्चयं राजा कालेन महता महान् ।
त्रिंशद्वर्षसहस्राणि राज्यं कृत्वा दिवं गतः ॥ २६

इति श्रीरामायणे बालकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

Arya Research Team

—^{c}) Ś1 D2-9 11 14 T2.3 G2 M3 निवर्त°, Ñ2 V B D1 10 13 M4 समाप°; G4 निर्वाप° (for निर्वर्तयामास) —^{d}) Ś1 D2(second time) 5 11 12 °रुध (D11 12 °ध्व [sic]), D14 T2 G M1 2 °तत्त्व, Cg as in text (for यथाकल्प). D9 °विधि· (for यथाविधि) Ñ2 V B D1–(D2 first time) 3 7 10 13 M4 नातिहृष्ट(Ñ2 B3 °कृष्ट, V3 B1 °हृष्ट, V4 °दस)मना इव

25 T1 missing up to गमे in ^{c} (cf vl 24) —^{a}) Dt D6 8 तु (for च) Ś1 D5 12 [अ]गमद्धीमान्, Ñ2 V2–4 B1 2 D10 13 ययौ धीमान्, V1 B3 4 M4 ययौ श्रीमान् (for [अ]गमच्छ्रीमान्) —^{c}) V2 [अ]भिगमने, V3 [अ]वतरणे, V4 [आ]गम°, Ck t as in text (for [आ]गमे राजा) D1–3 7 M4 गंगावतरणे तत्र —^{d}) T2 M2 °गच्छति, G3 नाधिगच्छति, Ct as in text (for नाध्यगच्छत) Ś1 Ñ2 V B D1–3 5 7 10–13 नाध्य(V2 °ध्या, D1 °ऽय)गच्छत्स (Ś1 D2 3 5 7 11 12 °द्धि, V2 B4 °त, D1 °द्धि, D13 °त्सु) निश्चयं ❀ Ck निश्चयमुपयनिश्चयम्। अध्यगच्छतेति। ❀

26 ^{a}) Cm g अकृत्वा (for अगत्वा). Ñ2 V B D10 11 13 चापि (for राजा) —^{b}) Dt मह ो, Cg as in text (for महता) Ñ2 V B D1–7 7.10 11 13 युयु(V4 सम्भ)जे क.लध- (D1 2 °क)र्मणा —^{d}) Ś1 D3 6 7.11 12 ययौ, Cg as in text (for गत.) Ñ2 V B D1 2 10 13 पालयित्वा महीमिमां. —After 26, Ś1 D5 11 12 ins

892* विधाय सोपानमिव क्रतु स·
प्रतापविद्योतितभूमिपृष्ठ.।
आरुह्य देवालयमुग्रतेजा-
श्चिक्रीड देशेषु मनोरमेषु।

On the other hand, B2 ins

893* जगाम त्रिदिवं राजा जित स्वेनैव कर्मणा।

Colophon T1 missing from colophon up to अंशुमतं in 1.41 1^{d} —*Kāṇḍa name* Ś1 D4 6 om Ñ2 V B D10 11 आदि°, D1 3 अयोध्या° —After Kāṇḍa name, B2 4 D9 ins बालचरिते —*Sarga name*. Ś1 Ñ2 V B D1–3 5 7 10–12 सगरयज्ञ(V4 °ज्ञ)समाप्ति (V4 °प्त); D9 सगरयज्ञपरिसमाप्ति —*Sarga no* (figures, words or both). Ś1 V1 4 B1 4 D2 5 11 12 om Ñ2 B2 3 D10 43, V2 45, V3 42, Dt D4 6 8 14 S (except T1) 41, D1 2.7 34, D9 44 D13 इत्यार्षे—यणे—काडे—समाप्तिर् 43 —After colophon, T2 concludes with श्रीरामचन्द्राय नम, G1 2 6 श्रीरामाय नम, G3 श्रीमते रामानुजाय नम, M1 2 श्री .... म

४१

कालधर्मं गते राम सगरे प्रकृतीजनाः ।
राजानं रोचयामासुरंशुमन्तं सुधार्मिकम् ॥ १
स राजा सुमहानासीदंशुमान्रघुनन्दन ।
तस्य पुत्रो महानासीद्दिलीप इति विश्रुतः ॥ २
तस्मिन्राज्यं समावेश्य दिलीपे रघुनन्दन ।
हिमवच्छिखरे रम्ये तपस्तेपे सुदारुणम् ॥ ३
द्वात्रिंशच्च सहस्राणि वर्षाणि सुमहायशाः ।
तपोवनगतो राजा स्वर्गं लेभे तपोधनः ॥ ४
दिलीपस्तु महातेजाः श्रुत्वा पैतामहं वधम् ।
दुःखोपहतया बुद्ध्या निश्चयं नाध्यगच्छत ॥ ५
कथं गङ्गावतरणं कथं तेषां जलक्रिया ।
तारयेयं कथं चैतानिति चिन्तापरोऽभवत् ॥ ६
तस्य चिन्तयतो नित्यं धर्मेण विदितात्मनः ।
पुत्रो भगीरथो नाम जज्ञे परमधार्मिकः ॥ ७

G I 44 5
B I 42 7
L. I 39 8

41

☞ Ñ1 missing Sarga 41 (cf v l I 33 8)

1 Before 1, D13 ins ref सू-उ-च T1 missing up to अंशुमन्तं on a damaged fol —^{a}) D5 12 -धर्म-, Cm g k as in text (for -धर्मं) Ñ2 V B D1–3 7 10 11 13 M4 तत प्रकृतयो राम —^{b}) Ñ2 V3 4 B D1–3 7 11 M4 स्वर्गते नृपे, D5 12 °जन, Cm g k t as in text (for प्रकृतीजना॰) V1 स्वर्गमुत्पतिते नृपे, V2 D10 13 स्वर्गते (V2 यास्यति) सगरे नृपे. —^{c}) Ñ2 V B D1–3 7 10 13 M4 धार्मिक (for राजानं) Ś1 चोद्°, D1–3 7 स्थाप°, D5 12 °मास (with hiatus), Cm g t as in text (for रोचयामासुर्) Ck cites ^{c} as in text. —^{d}) Ś1 D5 11 12 महाद्युतिं, Ñ2 V1 2 4 B D1–3 7 10 13 M4 नराधिपं, V3 महीपतिं (for सुधार्मिकम्)

2 ^{a}) Ś1 D5 12 राजा च (for स राजा) G1 3 तु (for सु-) D13 स राज्ञामशुमानासीद्, Cg as in text (for ^{a}) —^{c}) Ś1 D5 12 °तेजा, Ñ2 V B D1–3 7 10 11 13 सम(V1 °*) भवद् (for महानासीद्) M4 तस्य पुत्रत्वमभवद्.

3 ^{a}) Dt D4 6 8 तस्मै, Cm g as in text (for तस्मिन्) V4 राज्ये (for राज्य) Ś1 °देश्य, V1 सनिवेश्य, V2 निवेश्याशु, B1 D2 3 G1 °विश्य, Dt D6–8 °दिश्य (for समावेश्य) —^{b}) D14 T1 2 G2 4 M1 3 अंशुमान् (with hiatus), Ct as in text (for दिलीपे) Ñ2 V B D1–3 7 9 (before corr) 10 13 M4 [S]था(B2 m, M4 सौ)शुमानपि(B4 D2 °निति), T1 damaged (for रघुनन्दन) —T1 damaged from 3^{c} up to महा in 4^{b} —^{c}) Ñ2 V B D10 13 राम, D1–3 7 9 14 T2 G2 4 M1 2 (also as in text) पुण्ये (for रम्ये) —^{d}) D12 तेऽ (for तेपे) Ś1 D5 11 12 तदाशुमान्, Ñ2 V B D1–3 7 10 13 महायशा (B1 °तपा), M4 तपोधन (for सुदारुणम्) —After 3, Ñ2 V B D1–3 7 10 11 13 M4 ins

894* गङ्गावतरणं पुण्य चिकीर्षुरमरद्युति.।
अनवाप्यैव त कामं स वै नृपतिसत्तम ।

[(l. 1) M4 राम (for पुण्य) V1 2 B1 D2 11 13 M4 अमित-द्युति —D13 om (hapl ?) l 2–4^{b} —(l 2) V4 च त° (hypermetric), D11 °राजा, M4 चैव स (for त काम) D3 7 ततो, M4 काम (for स वै) D1 2 नृपतिर्नृ(D2 गत स नृ)पसत्तम, D11 काम नृवरोत्तम (submetric) (for the post half).]

4 D13 om 4^{ab}, T1 damaged up to महा in ^{b} (cf v l. 3) —^{a}) Ś1 Ñ2 V1 3 B3 4 D10 M4 °त्रिंशतं (Ś1 °त॰, V3 D10 °त-), V4 D3 5 7 11 12 स द्वा(V4 कृत्वा)त्रिंश(D3 °*)द्, B1 द्वात्रिंशत् (submetric), B2 (m also as in Ñ2) द्वाविंशति- (for द्वात्रिंशच्च) Dt D6 8 द्वात्रिंशच्छतसाहस्रं —^{b}) G1 3 तप॰ कृत्वा (for वर्षाणि सु-). D14 T2 G2 4 M1 3 सुमहातपा Ś1 Ñ2 V B D1–3 5 7 10–12 M4 वर्षाणा(D12 °*)ममर(Ś1 D1 5 11 12 °मित)द्युतिः(Ś1 D1 2 5 12 M4 °प्रभ, D3 7 11 °प्रभु) —T1 om (hapl ?) 4^{cd}. —^{c}) K(ed) तपोवनं. D14 T2 G2 4 M1 राम (for राजा) Ś1 D5 11 12 तपोवने तप कृत्वा, Ñ2 V B D1–3 7 9 10 13 M4 तपस्तप्त्वा महाघोर(M4 सुघोरं स) —^{d}) Ś1 G2 लोके, Cg as in text (for लेभे) Ś1 D5 11 12 M2.4 स्वकर्मजं(M2 °मि, M4 °णा), Ñ2 V B D10 13 महामना; D1-3 7 14 T2 G2 4 M1 महायशा (for तपोधन)

5 Ñ2 V3 B1 D10 13 om (hapl), B3 reads in marg 5–7 —^{a}) V1 2 B2–4 D1–3 7 11 M4 दिलीपोपि —^{b}) D2 पितामह (sic) V4 B2–4 D2 3 7 वच, D12 विधिं, Cg k t as in text (for वधम्) —^{c}) M2 -हितया, Cm g as in text (for -हतया) V1 lacuna, V2 तमेवाचिंतयन्नाथ, D1–3 7 9 11 M4 तमेव चिंतयन्नयं (D11 °न्नित्य) —^{d}) D2 14 S (except M3 4) नाधिगच्छति, Cm g नाध्यगच्छत (as in text) Ś1 V4 B2–4 D5 12 नाध्यगच्छत्स(V4 °च्च) निश्चयं

6 Ñ2 V3 B1 D10 13 om, B3 reads in marg 6 (cf v l 5) —^{b}) D5 गगा- (for तेषा) T1 missing from क्रिया up to महा in 8^{a} on a damaged fol —^{c}) B4 °येहं, D14 °यैनं (for तारयेयं) Ś1 V1 4 B2–4 D5 12 वं (V1 lacuna)धून्, V2 D2 3 7 9 त्वेतान्, D1 त्वेपाम्, D14 T2 M4 चैनान्, G4 चैव (with hiatus) (for चैतान्). —^{d}) M3 चिंताकुलो (for °परो).

7 Ñ2 V3 B1 D10 13 om, B3 reads in marg 7, T1 missing (cf v l 5 and 6 respy) —^{a}) D11 चितय*स्. V1 2 D1–3 7 9 11 त्वेवं(V1 °*) (for नित्य) —^{b}) Ś1 V4

G 1 44 6
B 1 42 8
L 1 39 9

दिलीपस्तु महातेजा यज्ञैर्बहुभिरिष्टवान् ।
त्रिंशद्वर्षसहस्राणि राजा राज्यमकारयत् ॥ ८
अगत्वा निश्चयं राजा तेषामुद्धरणं प्रति ।
व्याधिना नरशार्दूल कालधर्ममुपेयिवान् ॥ ९
इन्द्रलोकं गतो राजा स्वार्जितेनैव कर्मणा ।
राज्ये भगीरथं पुत्रमभिषिच्य नरर्षभः ॥ १०
भगीरथस्तु राजर्षिर्धार्मिको रघुनन्दन ।
अनपत्यो महातेजाः प्रजाकामः स चाप्रजः ॥ ११
स तपो दीर्घमातिष्ठद्गोकर्णे रघुनन्दन ।
ऊर्ध्ववाहुः पञ्चतपा मासाहारो जितेन्द्रियः ॥ १२

D5 12 M4 विजितात्मन ; Ct as in text (for विडि°) V1 2 D1–3 7 9 11 कथामेता(D11 नृपते सु) महात्मन —[c]) B3 राम, D2 7 9 जज्ञे (for नाम) —[d]) V1 om, D2 7 9 सर्व-; D3 *ज्ञे (for जज्ञे) V1 2 D1–3 7 9 लोक(V1 * *, D3 सर्वलोक [hypermetric])परिश्रुत

8 T1 missing partially [a] (cf v l 6) —[a]) Ñ2 V B D1–3 7 9–11 13 दिलीपोपि —[b]) Ñ2 V B1 3 4 D1–3 7 10 11 ईजि(V1 3 B4 °यि)वान् (for इष्टवान्) Ś1 D5 12 यज्ञैश्च बहुभिर्यजन्(D12 °र्जयन् [metathesis]) —G4 om (hapl) 8[c]–9 —[c]) Ś1 V B1 2 D5 11,12 विंशति(V3 °तिर्) वै, Ñ2 B3 °च्च वै, B4 विंशति द्वे; D1 (m also) दशवर्ष-, D10 13 °च्चैव (for त्रिंशद्वर्ष-) V4 °स्राणा(for -सहस्राणि) —[d]) Cm g t अकारयत् (as in text). Ś1 Ñ2 V B D5 10–13 वर्षाणा गा(V1 *)मपालयत्

9 G4 om 9 (cf v l. 8) —[a]) Ś1 D5 12 तास्तु (for राजा) —[b]) G2 M1 उत्तारणं (for उद्धरणं) Ś1 D5 12 समुद्धर्तुमशक्नुवन्, M4 गगावतरण प्रति. —For 9[ab], Ñ2 V B D1–3 7 9–11 13 subst

895* निश्चय चाप्यगत्वैव गङ्गावतरणे तत ।

[D1–3 7 9 11 सोपि (for चापि). B1 [अ]गात्वैव, D11 °न (for [अ]गत्वैव) D2 गगावतरण (for °तरणे) V4 D3 7 नृप°; D2 गत (for तत)]

—[c]) Ś1 D1 3 5 7 11 12 विधिना, V2 व्याधिवान्; Cm.k t as in text (for व्याधिना) —T1 missing from नर up to र्षभ in 11[b] on a damaged fol D2 10 -शार्दूल (for -शार्दूल) —[d]) D4 -धर्म (for -धर्मम्) D1 समी°, Cg as in text (for उपेयिवान्) Ñ2 V B D2 3 7 9–11 13 M4 कालस्य वशमीयिवान् (V4 °ता गत°, D9 [after corr] °मेयिवान्)

10 T1 missing (cf v l 9) —[a]) V1 D5 इंद्रलोकगा, D1–3 7 9 11 स्वर्गं प्राप्य(D2 7 °प, D11 °यात्) ततो, G2 इंद्र-नील गतो, M4 स्वर्गं पुण्यगतो, Cg as in text (for इन्द्रलोक गतो) —[b]) Ś1 D2 5 12 M4 स्व(D2 स्वो, M4 स्वा)र्जित स्वेन, Ñ2 V B3 4 D3 7 9 10 13 स्वोर्जि, Ñ2 B4 D10 °र्चि)त(B4 °त) पुण्य-, B1 [आ]त्मार्जित पुण्य-, B2 D1 11 स्वा(D1 स्व)र्जित (D1 °त) पुण्य, G2 M1 °तैरेव (for स्वार्जितेनैव) D2 तेजसा, G2 M1 कर्मभि (for कर्मणा) —[c]) D9 राष्ट्रे (for राज्ये) Ñ2 V B D1–3 7 10 11 13 M4 राज्यं भगीरथे पुत्रे, Ck as in text (for [c]) —[d]) V4 निक्षिप्य च, Cg k as in text (for अभिषिच्य) T2 G4 °भ, G1–3 M1 2 °भं (for नरर्षभ°) Ś1 Ñ2 V1–3 B D1–3 5 7 9–13 M4 निक्षिप्य(D9 °क्षाप्य) पुरुषर्षभ(Ś1 D9 °भ, V1–3 B1 D1 2 M4 °भ, B3 4 D10 °भे)

11 T1 missing up to र्धा in [b] (cf v l 9) —[a]) D9 स (for तु) Ś1 Ñ2 V B D1–3 5 7 10–13 M4 भगीरथोपि (V1.3 B2 3 D13 थ) राजाभूद् —D1 2(after 11) 11 ins after 11[ab], D3 7 9 subst for 11[cd]

896* तस्यापि परमो यत्नो गङ्गावतरणेऽभवत् ।

—D5 12 om 11[c]–12[b] Ś1 reads 11[c]–12[b] (including 897*) in marg —[c]) Ś1 Dt D6 8 °राज, Ñ2 V B D10 11 13 M4 सदा(D13 °चा)काक्षन् (D10 13 °क्षेत्) (for महातेजा°) —[d]) Ś1 Dt D8 Ct च प्रजा, D1 यत्नत, G4 च प्रज° (sic), Cm g as in text (for चाप्रज) Ñ2 V B D10 11 13 M4 सदृशीमात्मन प्रजां —After 11, Ś1 Dt D4 6 8 14 S (except M4) Cg t ins

897* मन्त्रिण्वाधाय तद्राज्यं गङ्गावतरणे रत° ।

12 D5 12 om, Ś1 reads in marg 12[ab] (cf v l 11) —[a]) Ñ2 V B D1–3 7 9 11 13 M4 महद् (for दीर्घम्) Ñ2 V2–4 B D11 आतस्थे (for आतिष्ठद्) Ś1 Dt D6 8 10 तपो दीर्घं समातिष्ठद्(D10 °तेपे) ❀ Cg t गङ्गावतरणेच्छुस्तप आतिष्ठत् । ❀ —[b]) Ñ2 V B D1–3 7 9 13 M4 [ऽ]नुपम-(D7 °*)द्युति, D10 [ऽ]नुपमद्युते (for रघुनन्दन) D11 राजा ह्यनुपमद्युति —[c]) D2 महा-(for पद्म-) —[d]) Ś1 D5 12 मिता°, M2 मास°, Cm g k t as in text (for मासाहारो) Ñ2 V B D1–3 7 9–11 13 M4 ग्रीष्मे(V4 ग्रीष्मेन [sic])भूत्वा(D1–3 7 9 M4 transp ग्रीष्मे and भूत्वा) य(D1 3 7 जि)तव्रत —After 12, Ñ2 V B D1–3 7 9–11,13 M4 ins

898* जलशायी च हेमन्ते वर्षास्वभ्रावकाशिक ।
क्षीर्णपर्णकृताहारो यतात्मा यतमैथुन ।

[(l. 1) V4 हिम (for जल-) Ñ2 V1 B1 भाव° (sic), D2.3 7 9 10 °काशक, D11 [आ]काशवाशिक, D13 [अ]वमनस्तथा, M4 °काशिन (for [अ]भावकाशिक) —(l 2) D1 -पत्र (for -पर्ण-) After कृताहारो, D3 erroneously repeats from त in जितव्रत (cf 12[d] in D1) up to आ in post. half of l 1 D1–3 7 9 M3 जि° (for यतात्मा) Ñ2 B3 D1–3. 7 9 10 13 M4 जित- (for यत)]

तस्य वर्षसहस्राणि घोरे तपसि तिष्ठतः ।
सुप्रीतो भगवान्ब्रह्मा प्रजानां पतिरीश्वरः ॥ १३
ततः सुरगणैः सार्धमुपागम्य पितामहः ।
भगीरथं महात्मानं तप्यमानमथाब्रवीत् ॥ १४
भगीरथ महाभाग प्रीतस्तेऽहं जनेश्वर ।
तपसा च सुतप्तेन वरं वरय सुव्रत ॥ १५
तमुवाच महातेजाः सर्वलोकपितामहम् ।
भगीरथो महाभागः कृताञ्जलिरवस्थितः ॥ १६
यदि मे भगवान्प्रीतो यद्यस्ति तपसः फलम् ।
सगरस्यात्मजाः सर्वे मत्तः सलिलमाप्नुयुः ॥ १७
गङ्गायाः सलिलक्लिन्ने भस्मन्येषां महात्मनाम् ।
स्वर्गं गच्छेयुरत्यन्तं सर्वे मे प्रपितामहाः ॥ १८
देया च संततिर्देव नावसीदेत्कुलं च नः ।
इक्ष्वाकूणां कुले देव एष मेऽस्तु वरः परः ॥ १९

G. 1. 44. 18
B 1. 42. 20
L 1. 39. 21

13 T2 moth-eaten up to घोरे in ^{b}.—^{a}) D3 तपस्य (sic) (for तस्य) Ś1 D3 5 7 11 12 -सहस्रेण, Ñ2 V B D1 10 13 M4 -सहस्राते (for -सहस्राणि) —^{b}) Ś1 D5 11 12 तपस्युग्रे महात्मन, Ñ2 V B D1–3 7 10 13 M3 तपसो (V4 °*) ग्रेण तोषित —After 13^{ab}, Ś1 (m) Dt D4 6.8 9 14 S (except M4) Cr m g t ins

899* अतीतानि महाबाहो तस्य राज्ञो महात्मनः ।

—^{c}) Cv r m g t सुप्रीतो (as in text) Ś1 D5 11 12 ब्रह्मा (D12 वर) प्रीतोभवद्राम, Ñ2 V B D1–3 7 10 13 M4 आजगामाश्रम ब्रह्मा (D2 3 7 °ममथो). —^{d}) D1 ब्रुवाणः, D12 प्रजा*, M4 चराणा (for प्रजानां) Ś1 Ñ2 V B Dt D1 5 6 8 10–12 G1 3 M2 4 प्रभुर् (for पतिर्) D2 3 7.9 ब्रह्मा (D9 सर्व)लोकपितामह, Ck as in text (for ^{d})

14 Dt reads 14 twice —^{a}) Ñ2 V B D1–3 7 9–11 13 M4 वृत, Cg as in text (for तत) Ś1 V2 4 D1–3 (D3 om) 5 7 9 11 12 सर्वै, Ñ2 V1 3 B D10 13 M4 श्रीमान् (for सार्धम्) —^{b}) Ś1 D5 11 12 सह लोक-(D11 °के), M1 उप° (for उपागम्य) Ñ2 V1 3 B D1–3 7 9 10 13 M4 विमानवरमास्थि (D1 °श्रि)त (D7 °तै·), V2 श्रीमानवरमास्थित, V4 श्रीमान्स्यंदनमास्थित —^{cd}) Ñ2 V B D1–3 7 9 10 13 M4 स एन(Ñ2 V D9 10 °व)माभाष्य (M4 °साद्य) तदा (D3 illeg for प्य तदा) (for ^{c}). D3 illeg, D7 9 दीप्यमानं (for तप्यमानम्) Ś1 D5 11 12 तप्यमान महात्मान (by transp) Ś1 D1.5 11 12 वचो, Ñ2 तम्; V1 2 4 B2 3 D3 7 9 10 M4 ततो, V3 B1 4 D2.13 तपो, G1 3 M3 तदा, Cg as in text (for अथ)

15 ^{a}) Dt D6.8 °राज, D4 T3 G1 3 M2.3 (after corr. *sec m* °राज.) °तेज., M4 °बाहो (for महाभाग) —^{b}) Ś1 Ñ2 V1–3 B D1 3 7 9 12.13 नरे°, V4 सुरे°, Dt D2.4 6 8 11 T3 जना (D2 11 नरा)धिप, D5 10 नरोत्तम (for जनेश्वर) M4 भगीरथ महारथ. —^{c}) Ś1 D5 11 12 त्वं (for च) Cm t तपसा च (as in text). D11 सुतवर (for सुतप्तेन) —^{d}) D11 दाते (sic) (for वरं) —For 15^{cd}, Ñ2 V B D1–3 7 9 10 13 M4 subst :

900* गृहाण वरमस्मत्त काङ्क्षितं पृथिवीपते ।

[V4 B1 त्व(V4 om [submetric]) वर मत्त (for वरमस्मत्त) D7 वर गृहाण मत्तस्त्व (for the prior half) D13 वाञ्छित (for काङ्क्षित).]

16 ^{a}) Ñ2 V B D1–3 7 10 11 13 M4 ततो दृष्ट्वा (B1 D11 M4 राजा), Cg as in text (for महातेजा·) Ś1 D5 12 उवाच सु(D12 स)महात्मानं. —^{b}) Ñ2 V B D1–3 7 10 11 13 M4 ब्रह्माण स्वयमागत —^{c}) Ś1 Ñ2 V B D1–3 5 7 10–12 T3 G1 M2–4 °तेजा, Dt D6 8 °बाहु·, D13 नरश्रेष्ठ (for महाभाग). —^{d}) Ñ2 V B D1 10 11 13 M4 इद वच, D2 3 7 अभाषतः D4 9 T3 उप° (for अवस्थित·) Ś1 D5 12 G1 3 M2 बद्ध्वा शिरसि चाजलि, Dt D6 8 कृताजलिपुट स्थित —After 16, B3 ins

901* उवाच नृपशार्दूल भक्त्या च नतकन्धर ।

17 ^{a}) Ś1 मा, B4 ते (for मे) V2 D2 5 6 9 11 12.14 T3 G1 M3 Cm °वन् (for भगवान्) —^{b}) Ñ2 V2–4 B D10 13 बल, V1 बल (sic) (for फलम्) —^{c}) Ñ2 V B D1–3 7 10 13 M4 ततः(D13 हता) सगरपुत्रास्ते(V2 °स्तु) —^{d}) D13 सगरम् (for सलिलम्) D9 आप्नुयात् (sic) Ck cites ^{d} as in text

18 D9 om 18 —^{a}) Ck cites ^{a} as in text —For 18^{ab}, Ś1 D5 12 subst .

902* गङ्गासलिलसंक्लिन्ने ते भस्मनि महौजस ।,
Ñ2 V B D1–3 7 10 11 13 M4 subst

903* गङ्गाजलप्लुते तस्मिन्देहभस्मनि पाविता ।

[V4 °प्लुत (sic), D3 °*ते, D7 -*ल°, D13 M4 -जला° (for -जलप्लुते) D2 3 7 दे(D3 *)शे, M4 देहे (for तस्मिन्) V2 B1 D13 देहे, M4 तस्मिन् (for देह-) V2 पातिता, D13 चानघ (for पाविता) D1–3 7 तस्मिन्म(D1 देशे भ)स्मनि प्ला(D3 7 पा)विते (for the post half).]

—^{c}) T3 M2 3 (after corr *sec m*) °र्थं, Cg as in text (for अत्यन्त) Ñ2 V B D1–3 7 10 11.13 M4 गच्छेयुरमलाः (V4 °रा·) स्वर्गं(B4 सर्वं [sic]), Cm t as in text (for ^{c}). —M2 om 18^{d}–20°. —^{d}) Ś1 D1–3 7 M3 4 ते, Ñ2 V B D10 11 13 न., Dt D6 8 च(for मे)

19 M2 om 19 (cf. v l 18). —^{a}) Ś1 Ñ2 V B D1–3 5 7 9–13 इय, M4 परा, Cm g t as in text (for देया). D2 मे, D14 m, Cg as in text (for च) Dt D6 8 देव याचे ह(D6 °ह) सतत्यै. —^{b}) Ś1 D5 12 नावसान कदाचन, Ñ2 V B2–4 D10 13 नावसाद(V4 °मानं) कथचन, B1

Aryan Research Team

G I 44 19
B. I. 42. 21
L. » 39 22

उक्तवाक्यं तु राजानं सर्वलोकपितामहः ।
प्रत्युवाच शुभां वाणीं मधुरां मधुराक्षराम् ॥ २०
मनोरथो महानेष भगीरथ महारथ ।
एवं भवतु भद्रं ते इक्ष्वाकुकुलवर्धन ॥ २१
इयं हैमवती गङ्गा ज्येष्ठा हिमवतः सुता ।
तां वै धारयितुं राजन्हरस्तत्र नियुज्यताम् ॥ २२
गङ्गायाः पतनं राजन्पृथिवी न सहिष्यते ।
तां वै धारयितुं वीर नान्यं पश्यामि शूलिनः ॥ २३
तमेवमुक्त्वा राजानं गङ्गां चाभाष्य लोककृत् ।
जगाम त्रिदिवं देवः सह सर्वैर्मरुद्गणैः ॥ २४

इति श्रीरामायणे बालकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

नावसीदेत्कथचन, D1-3 7 9 11 M4 नोच्छिद्येत कथं(D1 11 M4 °दा)चन. ❀ Cm g t यया(Ct यथा) नः कुल नावसीदेद् । ❀ —^{c}) G4 ऐक्ष्वाकूणा B1 कुल (for कुले) Ś1 Ñ2 V B D5 10 12 13 गच्छेद् (for देव) D1-3 7 9 11 इक्ष्वाकुराज(D9 °वंश)प्रभवा —^{d}) Ś1 V1 3 B4 वरो वर , Ñ2 V4 B3 D10 13 [अ]परो वर , V2 B1 वरोपरः, B2 Ck परो वर (by transp), D12 वचो मम (for वरः परः) D1-3 7 9 11 M4 वरमेन(D1 11 M4 °त, D9 °क) वृणोम्यह(D2 °तोस्म्यह, M4 °णोमि ते), D5 एष तेस्तु वरो मम

20 M2 om 20^{ab} (cf v l 18) Ś1 repeats 20^{ab} in marg —^{a}) Cg उक्त- (as in text) Ñ2 V B D1-3 7 9-11 13 M4 इत्युक्त(B3 D2 3 °क्त्वा, B4 °क्त [sic])वाक्य (V4 D9 °वत) (for उक्तवाक्य तु) —^{c}) V3 इत्युवाच Cg शुभा (as in text) D1-3 7 9 11 M4 तदा(M4 °तो) राम (for शुभा वाणीं) —^{d}) Cg मधुरा (as in text) D4 reads मधुरा in मधुराक्षराम् in marg Ś1 Ñ2 V B D5 10 12 13 मधुराक्षरभूषिता(V2 °समिता, B4 °विभूषिता [hypermetric]), D1-3 7 9 11 M4 वाक्य श्रुति(D11 सुत)सुखावह, M2 मधुर मधुराक्षर .

21 ^{a}) T3 महा°, Cg k t as in text (for मनोरथो) D4 T3 °राज, G1 M2 °तेजा(G1 °जो [sic]), G3 °भाग (for महानेष) Ś1 Ñ2 V B D1-3 5 7 9-13 तपोधन महाभाग —^{b}) V3 °मना., D11 °बल (sic) (for महारथ) —Note hiatus between ^{c} and ^{d} —^{c}) Ñ2 V B D10 13 M4 [अ]विच्छिन्नम् , D5 °व, D12 °च(for भद्रं ते) —^{d}) Ś1 -कुलनंदन, Ñ2 B3 D10 13 -कुलसभवं(D13 °व), V B1 2 4 D1-3 5 7 9 11 12 G1 3 M4 -कु(B1 *)लमव्ययं (for -कुलवर्धन) —After 21, B4 ins 904*

22 ^{ab}) Cv r m cite ^{a} as in text Dt D6 8 transp गंगा and ज्येष्ठा —For 22^{ab}, Ś1 D1-3 5 7 9 11 12 subst , while B2 ins after 905*, whereas B4 ins after 21

904* या सा देवनदी गङ्गा ज्येष्ठा हिमवत सुता ।
[B4 श्रेष्ठा (for ज्ये°)]

—For 22^{ab}, Ñ2 V B (B4 reads after 904*) D10 13 subst.

905* इयं तु गङ्गा सरिता प्रवरा स्वर्गतश्च्युता ।
[Ñ2 V4 B3 च (for तु) V4 प्रवरा सरितां (by transp)]

—Thereafter Ñ2 V B (B2 after 904*) D10 13 cont

906* दारयेत्पृथिवीं कृत्स्ना निपतन्ती महौघिनी ।
[D13 सर्वां (for कृत्स्ना) B1 निष्पतती]

—^{c}) D2 तु (for वै) M3 Cg शक्तो (for राजन्) Ñ2 V B D10 13 तदस्या धारणे राजन् —^{d}) T2 रहस् (metathesis), M3 (before corr as in text, after corr *inf lin sec m*) नरस्, M4 शिवस् (for हरस्) M4 प्रयुज्यता Ś1 Ñ2 V B D1-3 5 7 9-13 शिवो(D13 महा)देव प्रसाद्य(B4 °सेव्य)तां, Cv r m g as in text (for ^{d})

23 ^{a}) D12 तरण (for पतनं) Ñ2 V B D1-3 7 10 11 13 व्यक्त (for राजन्) —^{b}) Cg पृथिवी(as in text) T2 स नहिष्यते (metathesis), G1 3 4 Cm °ति (for न सहिष्यते) Ś1 Ñ2 V B D1-3 5 7 9-13 भूमि सोढुं न शक्ष्यति (V3 B4 °क्यति [sic], V4°क्यते, D3 °शशंक्ष्यति [sic]) —After 23^{ab}, Ś1 D1-3 5 7 9 11 12 ins

907* अतिवेगात्पतन्ती गा भित्त्वा पातालमाविशेत् ।

—^{c}) D6 om वै (submetric) Cm g धारयितु(as in text) Dt D4 6 8 T3 राजन् (for वीर) Ś1 Ñ2 V B D1-3 5 7 9-13 तस्या(V3 °स्माद्) धारयितार च —^{d}) Ś1 Ñ2 V B D1-3 5 7 9-13 शकरात् (for शूलिन) —For 23, M4 subst

908* दारयेत्पृथिवीं कृत्स्ना पतमाना महोर्मिका ।
तदस्या धारणे देवं शिव तावत्प्रसादय ।
गगनाच्च्युता राजन्न एना धारयिष्यति ।
नान्यस्तस्माच्छिवादस्या शक्तो वेगं हि दु सहम् ।
सोढु निपतमानायास्तस्मात्त्वं प्रसादय । [5]

[For the prior half of l 1 cf that of 906*]

—After 23, Ñ2 V B D10 13 ins

909* वेग सुदु सहं लोके तस्मात्त्वं प्रसादय ।

[V4 लोकस् (sic) —For the post half cf that of l 5 of 908*. V1 3 B1 4 त्व न (by transp), V4 त * (for न त्व)]

24 ^{a}) M4 म (for तम्) V3 राजर्षि (for राजानं). —^{b}) Ś1 M2 आभाष्य, D12 चाभ्य* (for चाभाष्य).

Arya Research Team

४२

देवदेवे गते तस्मिन्सोऽङ्गुष्ठाग्रनिपीडिताम् ।
कृत्वा वसुमतीं राम संवत्सरमुपासत ॥ १
अथ संवत्सरे पूर्णे सर्वलोकनमस्कृतः ।
उमापतिः पशुपतीं राजानमिदमब्रवीत् ॥ २
प्रीतस्तेऽहं नरश्रेष्ठ करिष्यामि तव प्रियम् ।
शिरसा धारयिष्यामि शैलराजसुतामहम् ॥ ३

G. I. 45. B. I. 43. L I 40

Ñ2 V B D10 13 M4 भगवा(M4 °व)न्प्र(V4 °वास्तु)पितामहः —After 24^{ab}, Ś1 ins 912*, while D1 (m) ins

910* गच्छ देवि धरापृष्ठ भगीरथशुमेच्छया ।
इत्युक्त्वा प्रययौ ब्रह्मा सर्वदेवनमस्कृत ।

—Ś1 reads 24^{cd} in marg —^{c}) Ś1 Dt D6 8 M2 देवैः (for देव·) —^{d}) Cm k t देवैर् (for सर्वैर्) Ś1 Dt D6 8 M2 सर्वै. सह (by transp) Cm g k t मरुद्गणैः (as in text) —For 24^{cd}, Ñ2 V B D10 13 subst

911* आभाष्य च महीं गन्तु गङ्गां स त्रिदिवं ययौ ।

[B4 om च (submetric). B2 reads (after corr) from हीं up to त्रि in marg Ñ2 V3 B1 3 4 D10 13 नेतु (for गन्तु) V2.4 transp गतु and गगा V1 दिग्रिव (metathesis) (for त्रिदिव)]

On the other hand, D1–3 5 7 11 12 M4 subst , while Ś1 ins after 24^{ab}

912* नियुज्य जगतीं गन्तुं गङ्गा प्रतिययौ तत ।
पुराण देवसदन सर्वदेवनमस्कृत. ।

[(1 1) Ś1 D3 5 11 12 नियुक्ता(D5 °युक्ता [sic]), D1 °योक्तु, D7 °क्त्वा (for नियुज्य) M4 च महीं (for जगतीं) M4 पुन (for तत) —M4 om 1 2 —(1 2) D1–3 7 11 पौ (D11 पु)राण ब्रह्मसदन (for the prior half) D5 -नमस्कृत (for -नमस्कृत)]

Colophon D1–3 5 7 12 om (Sarga cont) —*Kāṇḍa name* Ś1 Ñ2 V1 4 D4 om V2 3 B D10 11 आदि° —*Sarga name* Ñ2 भगीरथप्रसाद, V1 2.4 B D10 11 भगीरथ(D11 om)वरप्रदान(D10 °ने), V3 भगीरथवरप्रसादनं, D9 गगावतरणं —*Sarga no* (figures, words or both) V1 4 B1 4 D11 om Ś1 Dt D4 6 8 14 S 42, Ñ2 B2 3 D10 44, V2 46, V3 43, D9 45 D13 —काडे—रथ—प्रदानं सर्गः 44 —After colophon, T2 concludes with श्रीरामचन्द्राय नम , G1 2 4 M1 2 श्रीरामाय नम , G3 श्रीमते रामानुजाय नम

42

☞ Ñ1 missing Sarga 42 (cf v l 1 33 8).

1 Before 1, D13 ins सूत उवाच —^{a}) Ñ2 V B D10 13 प्रजापतौ, Cm g k t as in text (for देवदेवे) D2 14 गतो (sic) (for गते) Ś1 D1–3 5 7 9 11 12 राम, M4 राजा (for तस्मिन्) —^{b}) Ñ2 V B D10 13 M4 अंगुष्ठाग्र- (for सोऽङ्गुष्ठाग्र-) Ñ2 V3 B3 D10 13 -प्रपीडितं, V1 2 4 B1.2 4 D11 G4 M4 -निपीडित(D11 G4 °त.) (for -निपीडिताम्) Ś1 D5 12 सोंगुष्ठाग्रेण पीडिता —^{c}) Ñ2 V B D10 13 M4 महीतल (for वसुमतीं) Ś1 Ñ2 V B D1–3 5 7 9–13 राजा (for राम) —^{d}) Ś1 Ñ2 V B D1–3 5 7 9–13 उपावसत् (Ś1 °गतम्, V1 D1 3 7 9 °विशत्, D2 °वसन्), M4 अतिष्ठत, Cm g as in text (for उपासत) D4 6 8 T1 वत्सर समुपासत, M3 समुपास्त समा नृप ❀ Ct समुपासतेत्यार्षं बहुवचनम् समुपास्तेत्यर्थ । ❀ —After 1, Ś1 (m) Ñ2 V B D10 11 13 14 T1 2 G M (M3 *inf lin sec m*) ins
